दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लपञ्चमी
चैत्र ०९ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-150 | 1 | मार्च 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारतं 'ग्लोबल साउथ' देशानां उदयमानानाम् अर्थव्यवस्थानाम् आवश्यकताः अपि पूरयिष्यति- शिक्षामन्त्री

3 मातृभाषायां गर्वं कुर्वन्तु, एषा एव अस्माकं परिचयः; नागपुरे 'युवा-संसद' राष्ट्रियाधिवेशने राज्यपालस्य महान् सन्देशः

5 संस्कृतभाषा न केवलं भाषा, अपि तु भारतीयसंस्कृतेः प्राणाः - जगदानन्दझाः

## पञ्चदश-कोट्योधिकेषु ग्रामीणगृहेषु नल-जल-सम्पर्कः प्राप्तः अस्ति, येन स्वास्थ्यस्य अभिवृद्धिः, जीवनस्तरस्य वृद्धिः, महिलानां गौरवः च वर्धितः - केन्द्रीय-जलशक्ति-मन्त्री



केन्द्रीय-जलशक्ति-मन्त्रिणा सी. आर. पाटिलवर्येण उक्तं यत्, पञ्चदश कोट्योधिकेषु ग्रामीणगृहेषु नल-जल-सम्पर्कः प्राप्तः अस्ति, येन स्वास्थ्यस्य अभिवृद्धिः, जीवनस्तरस्य वृद्धिः, महिलानां गौरवः च वर्धितः। मन्त्री षड्विंशत्यधिक द्विसहस्रतम वर्षस्य जलमहोत्सवस्य समापनकार्यक्रमस्य भागत्वेन आयोजिते सुजलग्रामसंवादस्य समये पञ्चराज्याणां सदस्येभ्यः आभासीय-माध्यमेन सम्बोधयन् आसीत्।

## जी7-देशैः ईरान-देशस्य आक्रमणानां तीव्रा निन्दा कृता; क्षेत्रीयसुरक्षायाः रक्षणाय आह्वानम्

सप्तानां समूहः (जी7) देशाः पश्चिम एशियायाः बहुविधदेशेषु नागरिकानाम् उपरि, प्रमुखसंरचनायाः उपरि च ईरान-देशस्य आक्रमणानां दृढतया निन्दितवन्तः। कनाडा, फ्रान्स, जर्मनी, इटली, जापान, यू.के., अमेरिकादेशानां च प्रतिनिधित्वं कुर्वन्तः जी 7 विदेशमन्त्रिणः, यूरोपीयसङ्घस्य उच्चप्रतिनिधिभिः सह संयुक्त वक्तव्ये दृढतया प्रभावितदेशैः सह ऐक्यं प्रकटितवन्तः। वक्तव्ये उक्तं यत् ईरान-देशात् तस्य प्रतिनिधिभिः च कृत आक्रमणानां सन्दर्भे अस्मिन् क्षेत्रे स्वसहभागिनां कृते समूहः समर्थनं प्रददाति। जी 7 देशाः ख्यापितवन्तः यत् इरान-देशस्य कार्यैः न केवलं लक्ष्यीकृतदेशाः संकटाप्रन्नाः अभवन्, अपितु क्षेत्रीय-वैश्विक-सुरक्षायाः कृतेऽपि विस्तृतः भयः अस्ति, येन तेहरानः तत्क्षणमेव स्वस्य-कार्याचरणान् स्थगयतुम् आग्रहं कृतवन्तः। समूहेन महत्त्वपूर्णानां समुद्रीय-मार्गाणां, वैश्विक आपूर्तिशृङ्खलानां च सुरक्षां सुनिश्चेतुं महत्त्वोपि अधोरेखितं, विशेषतः सामरिकदृष्ट्या महत्त्वपूर्णस्य होर्मुज-जलसंधिं प्रति। जी 7 विदेशमन्त्रिणः उक्तवन्तः यत्, ते वैश्विक ऊर्जा आपूर्ति समर्थयितुं आवश्यकानि उपायानि कर्तुं सज्जाः सन्ति ।

## पश्चिम-एशिया-सङ्कटम्-: प्रधानमन्त्रिणा ऊर्जा-सुरक्षायाः उर्वरक-आपूर्तेः च समीक्षा कृता



पश्चिम-एशियायाः स्थितौ पेट्रोलियम, अशोधिततैल वातीन्धन, ऊर्जा, उर्वरकादीनां च क्षेत्राणां स्थितिं समीक्षितुं प्रधानमन्त्रिणा नरेन्द्रमोदिना उच्च-स्तरीय उपवेशनस्य अध्यक्षता कृता। नवदेहल्याम् आयोजितः सम्मेलनः, सम्पूर्ण देशे अविरामपूर्ति, सुस्थिरं रसदं, दक्षं वितरणं च सुनिश्चतुं केन्द्रितः आसीत्। रक्षामंत्री राजनाथसिंहः, गृहमन्त्री अमितशाहः, वित्तमन्त्री निर्मला सीतारामनः, विदेशमन्त्री एस. जयशङ्करः, कृषिमन्त्री शिवराजसिंह चौहानः, पेट्रोलियम-प्राकृतिकगस मन्त्री हरदीपसिंह पुरी, वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः, रसायन-उर्वरक मन्त्री जे. पी. नड्डाः, नागरिक उड्डयन मन्त्री के. राममोहन-नायडुः, ऊर्जामन्त्री मनोहरलालः, सूचना-प्रसारण-मन्त्री अश्विनी वर्णिवः च सभायां उपस्थिताः आसन्।

**प्रशासनेन आश्वासितं यत् सम्पूर्ण देशे आवश्यकेन्धनानां अभावः नास्ति ।**

प्रशासनेन पुनः आश्वासितं यत् सम्पूर्ण देशे आवश्यकेन्धनानां अभावः नास्ति, तैल शोधागाराणि उच्चक्षमतया कार्यं कुर्वन्ति, पेट्रोल-डीज़ल-इन्धनयोः पर्याप्तं भण्डारम् उपलभ्यते। आपणेषु अभावः नास्ति। एकस्मिन् वक्तव्ये पेट्रोलियम-प्राकृतिक मन्त्रालयः अवदत् यत् एल. पी. जी. सिलिण्डर इत्यस्य वितरणं सामान्यम् एव अस्ति। गुप्तरूपेण संग्रहणम् अपि न्यूनम् अभवत्। राज्यानां कृते वाणिज्यिक एल. पी. जी. वितरणम् अपि वर्धितम् अस्ति, यत्र शैक्षणिकसंस्थाः, चिकित्सालयाः इत्यादीनां प्रमुखक्षेत्राणां कृते प्राधान्यम् प्रदत्तम् अस्ति। अत्रान्तरे, पत्तन-पोत परिवहन-जलमार्ग मन्त्रालयः अवदत् यत्, नौवहनस्य गतिविधिः, नौकाश्रय-प्रचालनं, भारतीयानां नाविकानां सुरक्षां च निकटतया निरीक्षमाणः अस्ति येन समुद्रीयव्यापारस्य निरन्तरता सुनिश्चितं भवेत्।

## बांगलादेशस्य कुमिला-नगरे रेलवे क्रासिङ्ग इत्यत्र रेल यात्रि-बस-यानयोः समाघाते न्यूनातिन्यूनं द्वादश जनाः मृताः, अन्ये च नेके व्रणिताः



बांगलादेशस्य कुमिला-नगरे रेलवे क्रासिङ्ग इत्यत्र रेल यात्रि-बस-यानयोः समाघाते न्यूनातिन्यूनं द्वादश जनाः मृताः, अन्ये च नेके व्रणिताः। व्यस्तस्य ढाका-च ग्राव-राजमार्गस्य समीपे कुमिला नगरस्य पाडुआ-बजार्-क्रासिङ्ग इत्यत्र एषा दुर्घटना अभवत्, यदा ढाका-नगरं प्रति गच्छन्ती रेल-यानेन रेलमार्गे प्रविष्टं बसयानं समाघातितम् । दुर्घनायाः अनन्तरं आरक्षकाः, अग्निशामकसेवाः, सैनिकाः, रेड्-क्रौसेण् सदस्याः च मिलित्वा स्थले उद्धारकार्यम् अकुर्वन्। व्रणिताः कुमिला-चिकित्सकीय-महाविद्यालय-चिकित्सालयं प्रति नीताः।

## गतवर्षे भयोत्पादन-सम्बद्धानां घटनानां षट्प्रतिशतानां वृद्धेः अनन्तरं पाकिस्तानदेशः प्रथमवारं वैश्विक भयोत्पादन-सूचकाङ्के प्रथमस्थाने अस्ति




गतवर्षे भयोत्पादन-सम्बद्धानां घटनानां षट्प्रतिशतानां वृद्धेः अनन्तरं पाकिस्तानदेशः प्रथमवारं वैश्विक-भयोत्पादन-सूचकाङ्के प्रथमस्थाने अस्ति। (आई. ई. पी.) इत्यनेन प्रकाशितस्य षड्विंशत्यधिक द्विसहस्रतम वर्षस्य वश्विक भयोत्पादन-सूचकाङ्कस्य अनुसारं पाकिस्तानदेशे भयोत्पादनात् मृत्युः अधुना उच्चतमस्तरे अस्ति।

## नवरात्रिविशेषः
### स्कन्धमाता



**सिंहासनगता नित्यं पद्माश्रितकरद्वया।
शुभदास्तु सदा देवी स्कन्दमाता यशस्विनी॥**

जो देवी सदा सिंह पर विराजमान रहती हैं और अपने दोनों हाथों में कमल का पुष्प धारण करती हैं, वे यशस्विनी स्कन्दमाता मेरे लिए सदा शुभदायी हों।

**२. उपासना मंत्र (Upasana Mantra)**

या देवी सर्वभूतेषु माँ
स्कन्दमाता रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमो नमः॥

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रधानविदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# सिक्किम-राज्यस्य पूर्वमुख्यमन्त्रिणः पवनकुमार-चामलिङ्ग वर्यस्य कीर्तिमतम् अतिक्रम्य, प्रधानमन्त्री नरेन्द्रमोदी भारत-सर्वकारस्य दीर्घतमः सेवा-प्रमुखः अभवत्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना देशे निर्वाचितसर्वकारस्य दीर्घकालं यावत् सेवायमानः प्रमुखः भूत्वा भारतीयराजनीतेः ऐतिहासिकं सोपानं प्राप्तम्। एतेन प्रधानमन्त्रिणा मोदिना पवनकुमार चामलिङ्ग इत्यमुं अतिक्रमितवान्, यो हि सिक्किम-राज्यस्य मुख्यमन्त्रीरूपेण त्रिंशोत्तर नवशताधिक अष्टसहस्र दिनानि यावत् कार्यम् अकरोत्। सः इदानीं सर्वकारस्य प्रमुखत्वेन एकत्रिंशोत्तर नवशताधिक अष्टसहस्र दिनानि पूरितवान्, गुजरातस्य मुख्यमन्त्रीरूपेण, प्रधानमन्त्रीरूपेण च स्वस्य कार्यावधिं संयुज्य, नेतृत्वे स्वस्य पञ्चविंशतितमे वर्षे प्रविष्टवान्। एतत् एकं दुर्लभं महत्त्वपूर्णं च उपलब्धि-रूपेण दृश्यते, यत् सर्वोच्चस्तरे अविरामजनसेवां, राजनैतिकिनेतृत्वं च प्रतिबिम्बयति। स्वस्य कार्यकाले, प्रधानमन्त्री मोदी गुजरात-राज्यस्य दीर्घतम सेवायुक्तः मुख्यमन्त्री, मुख्यमन्त्रीरूपेण दीर्घतमपूर्वानुभवयुक्तः प्रधानमन्त्री चेति अनेकानि उल्लेखनीयानि कीर्तिमतं स्थापितवान्। सः स्वातन्त्र्यानन्तरं जन्मितः भारतस्य प्रथमः प्रधानमन्त्री अपि अस्ति, तथा च चतुर्दशाधिक द्विसहस्र, ऊनविंशत्यधिक द्विसहस्र, चतुर्विंशत्यधिक द्विसहस्रतमे वर्षे च क्रमशः लोकसभानिर्वाचने विजयं प्राप्तवान्। श्रीमोदी प्रथमवारं एकाधिक द्विसहस्रतम वर्षस्य अक्टूबर मासस्य सप्तमे दिनाङ्के गुजरातस्य मुख्यमन्त्रीरूपेण कार्यभारं स्वीकृतवान्, चतुर्दशाधिक द्विसहस्रतम वर्षस्य मई एकविंशति दिनाङ्कपर्यन्तं दायित्वं निरवहत्, राष्ट्रिय राजनीतिं प्रति गमनात् पूर्वं त्रयोदशवर्षाणि यावत् राज्यस्य नेतृत्वं कृतवान्। सः चतुर्दशाधिक द्विसहस्रतमे वर्षे मई षड्विंशति दिनाङ्के भारतस्य चतुर्दशतमः प्रधानमन्त्रीरूपेण शपथ ग्रहणं कृतवान्, लोकसभायां पूर्णबहुमतं प्राप्तः प्रथमः काङ्ग्रेस-इतरः नेता अभवत्। सिक्किम-राज्यस्य पूर्वमुख्यमन्त्रिणः पवनकुमार-चामलिङ्ग वर्यस्य कीर्तिमतम् अतिक्रम्य, प्रधानमन्त्री नरेन्द्रमोदी भारत-सर्वकारस्य दीर्घतमः सेवा-प्रमुखः अभवत् इति केन्द्रीय गृहमन्त्रिणा अमितशाहेन उक्तम्। एकस्मिन् सामाजिकान्तर्जालीये पटले श्रीशाहः सेवायाः, परिश्रमस्य, अचञ्चलप्रतिबद्धतायाः च मूलाधारः अवर्णयत्।

# ऊर्जामन्त्री भारतविद्युत्-शिखरसम्मेलनस्य समापनसत्रं सम्बोधितवान्



विद्युदुत्पादनम् आधारभूतम् आवश्यकम् इति केन्द्रीय ऊर्जामन्त्री मनोहरलालः अवधानं दत्तवान् यत् सामान्यजनेभ्यः न्यूनमुल्येषु विद्युदुप्रदानम् आवश्यकं। नवदेहल्यां षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारतविद्युत्-शिखरसम्मेलनस्य समापनसत्रम् अभिसंबोधयन् मन्त्री महोदयः इदम् उक्तवान्। ऊर्जा-मन्त्रिणा उक्तं यत् सौभाग्य योजना, प्रधानमन्त्री-सूर्य-घर इत्यादिभिः योजनाभिः, इदानीं सीमायाः क्षेत्रेण सह, सम्पूर्ण देशे दूरस्थेषु क्षेत्रेषु विद्युत् सम्प्राप्ता अस्ति। सः अवदत् यत्, ऊर्जाक्षेत्रस्य भविष्यं निर्धारयन्तः प्रमुखाः विषयाः चर्चयितुं शिखरसम्मेलनस्य मञ्चे नीतिनिर्मातारः, उद्योगप्रमुखाः, निवेशकाः, आविष्कर्तारः च मिलित्वा ऊर्जाक्षेत्रस्य भविष्यस्य विषये चर्चा कुर्वन्ति।

# भारतं 'ग्लोबल साउथ' देशानां उदयमानानाम् अर्थव्यवस्थानाम् आवश्यकताः अपि पूरयिष्यति-शिक्षामन्त्री




केन्द्रीयशिक्षामन्त्री धर्मेंद्र प्रधानः विश्वासं प्रकटितवान् यत् भारतं न केवलं स्वकीयाः तकनीकी-आवश्यकताः पूरयिष्यति, अपितु 'ग्लोबल साउथ' (Global South) देशानां उदयमानानाम् अर्थव्यवस्थानाम् आवश्यकताः अपि पूरयिष्यति।

श्रीप्रधानः आईआईटी-बोम्बे (IIT Bombay) मध्ये आयोजितस्य द्विदिवसीयस्य 'भारत इनोवेट्स डीप-टेक प्री-समिट २०२६' इति शिखरसम्मेलनस्य समापनसमारोहं सम्बोधयन् आसीत्। तेन उक्तं यत् आगामिनि दशके भारतं 'डीप-टेक' (Deep-tech) क्षेत्रस्य नेतृत्वं करिष्यति। सः 'भारत-फ्रांस नवाचार वर्षं' इत्यस्य अन्तर्गतं अस्मिन् वर्षे जूनमासे फ्रान्सदेशे जी-७ (G-7) शिखरसम्मेलनस्य अवसरे प्रदर्शितायाः अत्याधुनिक-प्रौद्योगिक्याः प्रशंसां कृतवान्।

**महत्त्वपूर्णबिन्दवः-**

**विकसितभारतस्य लक्ष्यम्-:** श्रीप्रधानेन उक्तं यत् २०४७ पर्यन्तं 'विकसितभारतस्य' स्वप्नं साकारं कर्तुं उत्तरदायित्वं शिक्षाजगतः, उद्योगस्य, वित्तक्षेत्रस्य, देशस्य यूनां च स्कन्धेषु अस्ति।

**2. वैश्विकक्षमता-:** तेन प्रतिपादितं यत् भारतेन प्रौद्योगिकीक्षेत्रे स्वक्षमता सिद्धा कृता, अतः अद्य सम्पूर्णं विश्वं भारतेन सह कार्यं कर्तुम् इच्छति।

**3. डॉ. के. राधाकृष्णन् इत्यस्य विचारः-:** कार्यक्रमे इसरो (ISRO) इत्यस्य पूर्वमहानिदेशकः, आईआईटी-बोम्बे इत्यस्य 'बोर्ड ऑफ गवर्नर्स' अध्यक्षः डॉ. के. राधाकृष्णन् विश्वासं प्रकटितवान् यत् 'भारत इनोवेट्स २०२६' भारतस्य तकनीकी-भविष्ये क्रान्तिकारी परिवर्तनं आनेष्यति।

**4. सहभागिता-:** आईआईटी-बोम्बे इत्यस्य निदेशकः शिरीष केदारे अवदत् यत् अस्मिन् द्विदिवसीये कार्यक्रमे १३७ स्टार्टअप्स (Startups) भागं गृहीतवन्तः, प्रायः २०० निवेशकैः (Investors) तथा ८० कॉर्पोरेट-संस्थाभिः सह विचारविमर्शः कृतः।

# उपराष्ट्रपतेः वक्तव्यम्-: योगविषये पारम्परिकचिकित्सापद्धतीनां महत्त्वम्

हिमसंस्कृतवार्ताः। उपराष्ट्रपतिः सी.पी. राधाकृष्णन् उक्तवान् यत् योगः आयुर्वेदः च सदृशाः देशस्य पारम्परिकचिकित्साप्रणालयः वैश्विकमान्यतां प्राप्तवन्तः सन्ति, अतः एताः 'वैकल्पिक-पद्धतयः' इति न मन्तव्याः। तेन प्रतिपादितं यत् पारम्परिकचिकित्साप्रणाली शारीरिक-मानसिकस्वास्थ्यं वर्धयति। महाराष्ट्रस्य पुणे नगरे उरुली कञ्चन स्थाने 'प्राकृतिक चिकित्सा ग्राम सुधार ट्रस्ट' इत्यस्य प्राकृतिकचिकित्साश्रमस्य ८१ तमे वार्षिकोत्सवे उपराष्ट्रपतिः जनान् प्राकृतिकजीवनशैलीं स्वीकर्तुं प्रकृत्याः समीपे स्थातुं च आग्रहं कृतवान्।

**गान्धिदर्शनस्य उल्लेखः-:** प्राकृतिकचिकित्सादर्शनस्य चर्चां कुर्वन् उपराष्ट्रपतिः अवदत् यत् महात्मा गान्धी प्रायः ८० वर्षेभ्यः पूर्वं प्राकृतिकचिकित्साकेन्द्रस्य माध्यमेन एतां विचारधारां प्रोत्साहितवान् आसीत्।

**एलोपैथिक-प्रभावः-:** सः भोजनस्य आदतेः परिवर्तनस्य तथा च 'एलोपैथिक' (Alloepathic) औषधेषु अत्यधिकनिर्भरतायाः प्रतिकूलप्रभावाणाम् उल्लेखं कृतवान्,



प्राकृतिकचिकित्सापद्धतीनां स्वीकारस्य आवश्यकतां च बलपूर्वकं प्रतिपादितवान्।

**आयुष्-मन्त्रालयस्य सुदृढीकरणम्-:** तेन उक्तं यत् नरेन्द्रमोदी-सर्वकारेण पारम्परिकचिकित्साप्रणालीं प्रवर्धयितुं 'आयुष्-मन्त्रालयः' सुदृढः कृतः अस्ति।

**पुस्तकोन्मोचनम्-:** अस्मिन् अवसरे श्रीराधाकृष्णन् महोदयः डॉ. एन. जी. हेगड़े वर्येण लिखितायाः 'सीक्रेट्स ऑफ हैप्पीनेस' (Secrets of Happiness) इति नाम्न्याः पुस्तकायाः विमोचनम् अपि अकरोत्।

# मातृभाषायां गर्वं कुर्वन्तु, एषा एव अस्माकं परिचयः; नागपुरे 'युवा-संसदः' राष्ट्रियाधिवेशने राज्यपालस्य महान् सन्देशः




**हिमसंस्कृतवार्ताः - नागपुरम् ।**
राज्यपालः कवीन्द्रगुप्तः नागपुर-स्थितस्य महर्षि-व्यास-सभागारस्य 'भारतीय-युवा-संसदः' राष्ट्रियाधिवेशनं सम्बोधयन् युनः मातृभाषायां गर्वं कर्तुं तथा 'विकसित-भारत-२०४७' निर्माणाय अग्रणीं भूमिकां निर्वोढुं च आहूतवान्। 'भारतीय-युवा-संसद-मीडिया-फाउण्डेशन्' तथा केन्द्रीय-संस्कृत-विश्वविद्यालयस्य संयुक्त-तत्त्वावधाने आयोजिते अस्मिन् अधिवेशने सम्पूर्णदेशतः प्रायः ६०० युनः भागं गृहीत्वा राष्ट्रिय-महत्त्वपूर्ण-विषयेषु लोकतान्त्रिकं विमर्शं कृतवन्तः।
राज्यपालः अवदत् यत् कस्यापि राष्ट्रस्य भाषा तस्य आत्मा परिचयश्च भवति। सः युवसु मातृभाषा-भाषणे वर्धमानां सङ्कोचं (झिझक) प्रति चिन्तां प्रकटयन् स्पष्टीकृतवान् यत् "आङ्ग्लभाषायाः शिक्षणं आवश्यकं वर्तते, किन्तु स्वभाषायाः मूल्येन (at the cost of own language) न।" सः अकथयत् यत् यः युवा मातृभाषायां चिन्तयति, सः अधिकं रचनात्मकः, आत्मविश्वासी, स्वसंस्कृतिना च गम्भीरतया सम्बद्धः भवति।

**भाषाई-विविधता 'एकं भारतं श्रेष्ठं भारतं' च**
देशस्य भाषाई-विविधतायाः उल्लेखं कुर्वन् सः काश्मीरी, डोगरी, पहाड़ी आरभ्य तमिळ, तेलुगु, बेङ्गाली, मराठी, संस्कृतं च प्रति अवदत् यत् एतत् अधिवेशनं 'एकं भारतं श्रेष्ठं भारतम्' इति भावनायाः जीवन्तम् उदाहरणम् अस्ति। सहैव सः युवभ्यः 'पञ्च-परिवर्तनानां' सङ्कल्पं दातुं प्रेरितवान्:
१. स्वबोधः (Self-awareness)
२. कुटुम्ब-प्रबोधनम् (Family awakening)
३. सामाजिक-समरसता (Social harmony)
४. पर्यावरण-संरक्षणम् (Environmental protection)
५. नागरिक-कर्तव्यम् (Civic duty)
राज्यपालः उक्तवान् यत् स्वतन्त्रतायाः १०० वर्षाणां पूर्णता-पर्यन्तं भारतस्य स्वरूपं अद्यतनानां यूनां ऊर्जा, नवाचारः (Innovation), प्रतिबद्धता च निश्चेष्यति।

# कैप्टन-संजयकुमारः युवभ्यः पाठयिष्यति देशभक्तेः पाठम्

## राज्यसर्वकारेण परमवीरचक्रविजेता सार्द्धं गृहीतः, मुख्यमन्त्रिणा बजटे कृता घोषणा



**हिमसंस्कृतवार्ताः - शिमला।** भारतीयसेनायां सम्मिलिताय प्रदेशस्य युनः प्रोत्साहयितुं सुक्खू-सर्वकारेण एकं नूतनं पदं स्थापितम्। परमवीरचक्रविजेता मानद-कैप्टन-संजयकुमारः (Honorary Captain Sanjay Kumar) महाविद्यालयेषु वरिष्ठ-माध्यमिक-विद्यालयेषु (Senior Secondary Schools) च अध्ययनरतान् युनः सेनायां योगदानाय प्रेरयिष्यति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः स्वस्य बजट-भाषणे इमां घोषणां कृतवान्।
मुख्यमन्त्रिणा उक्तं यत् सर्वकारेण तेभ्यः आग्रहः कृतः यत् ते प्रदेशस्य छात्रान् सशस्त्रदलेषु (Armed Forces) प्रवेष्टुं मार्गदर्शनं कुर्वन्तु। तेषां प्रोत्साहनेन न केवलं युवसु देशभक्ति-भावना जागृतुं भविष्यति, अपितु ते नशा-इत्यादि-व्यसनेभ्यः कुरीतिभ्यः च मुक्ताः भविष्यन्ति। मुख्यमन्त्री अवदत् यत् कैप्टन-संजयकुमारेण सर्वकारस्य एषः प्रस्तावः स्वीकृतः। अस्य कृते सर्वकारः तेभ्यः 'मासिक-सम्मान-निधिम्' प्रदास्यति। ते बिलासपुर-सैनिक-कल्याण-कार्यालयात् एव स्वसेवाः दातुं स्वतन्त्राः भविष्यन्ति।

## कारगिल-युद्धे अदम्यं साहसम्

मानद-कैप्टन-संजयकुमारः बिलासपुर-जनपदस्य कलोल-बकैन ग्रामस्य निवासी अस्ति। सः 'जम्मू-कश्मीर राइफल्स' इत्यस्य १३ तमे बटालियन-मध्ये स्वसेवाः दत्तवान्। कारगिल-युद्धकाले सः तस्यां टोल्यां (Team) सम्मिलितः आसीत्, यस्यै मशकोह-घाटी क्षेत्रे 'फ्लैट टॉप' (प्वाइंट ४८७५) उपरि अधिकारं प्राप्तुं कार्यं दत्तम् आसीत्। सः शत्रोः 'बङ्कर' मध्ये प्रविश्य सम्मुखयुद्धे त्रीन् पाकिस्तानी-सैनिकान् हतवान् आसीत्।

## युवकान् प्रेरयिष्यति

परमवीरचक्रविजेता संजयकुमारः 'दिव्य-हिमाचल' इत्यनेन सह वार्तालापं कुर्वन् अवदत् यत् सः सर्वकारस्य प्रस्तावाय सज्जः अस्ति। प्रदेशस्य यूनां प्रेरणाय सः स्वसेवाः प्रदास्यति। मुख्यमन्त्री-कार्यालयेन सह जात-वार्तानुसारं सः अस्य मासस्य अन्तिमे सप्ताहे अथवा आगामि-मासे शिमला-नगरम् आगन्तुं शक्नोति।

# हिमाचल-बजटम् २०२६-२७: पर्यटनस्थलेषु 'रात्रिकालीन-भोजस्य' सुविधा भविष्यति, ४० ग्रामाः 'मन्द-पर्यटन-केन्द्राणि' भविष्यन्ति



**हिमसंस्कृतवार्ताः - डॉ पद्मनाभः, शिमला।**
हिमाचलप्रदेशसर्वकारः पर्यटनक्षेत्रे नूतनशिखरं नेतुं काश्चन अभिनवं पदं (Initiatives) कर्तुं गच्छति। अस्य अन्तर्गतं प्रमुखपर्यटनस्थलेषु 'नाइट पिकनिक' (रात्रिकालीन-भोजस्य) सुविधा आरप्स्यते, येन पर्यटकाः रात्रिकालीन-अनुभवं प्राप्तुं शक्नुवन्ति, स्थानीय-रोजगारस्य अवसराः च वर्धिष्यन्ते। सर्वकारः 'वीकेण्ड टूरिज्म' (सप्ताहान्त-पर्यटनम्) प्रवर्धयितुं विविधाः चत्वारिंशत् (४०) ग्रामाः 'स्लो टूरिज्म' (मन्द-पर्यटनम्) रूपेण विकसिताः करिष्यन्ते।

**मुख्य-घोषणाः**
- कारवा-पार्क-स्थापनाः सोलन-मण्डी जनपदयोः 'कारवा-पर्यटन-पार्क' (Caravan Parks) पीपीपी (PPP) आधारेण स्थापयिष्यन्ते।

> **धार्मिक-पर्यटनम्:** श्रीज्वालाजी-श्रीनयनादेवी सदृश-शक्तिपीठानां विकासः भविष्यति। ज्वालाजी-होटल-विस्ताराय ३५ कोटि-रूप्यकाणि व्ययिष्यन्ते।

> **एरोसिटी-निर्माणम्:** काङ्गड़ा-विमानस्थानकस्य (गगल) समीपे विश्वस्तरीय-सुविधायुक्तं 'काङ्गड़ा एरोसिटी' (Kangra Aerocity) नामकं नूतनं नगरं विकसितं भविष्यति।

> **महिला-पर्यटन-कोषः:** 'एचपी वूमेन टूरिज्म फण्ड' इत्यस्य माध्यमेन महिलाभ्यः स्वव्यवसायाय ३ लक्षरूप्यकाणां अनुदानं साहाय्यं च दास्यते।

> सुरक्षा-प्रोटोकॉलः: एकल-महिला-यात्रिणां सुरक्षां सुनिश्चितं कर्तुं 'शी ट्रेवल' (She Travel) इति देशस्य प्रथमं 'सोलो-ट्रेवल-प्रोटोकॉल' प्रवर्तयिष्यते।

**आधुनिकीकरणं फिल्म-नीतिश्च:**

> हिम फिल्म पोर्टल: चलच्चित्र-चित्रीकरणस्य (Film Shooting) अनुमतिं सरलीकर्तुं 'हिम फिल्म पोर्टल' स्थापयिष्यते।

> **डिजिटल-पञ्जीकरणम्:** पर्यटकाणां दत्तांशाय (Data) सुरक्षायाः कृते च 'डिजिटल विजिटर रजिस्ट्रेशन एवं टूरिज्म इण्टेलिजेन्स सिस्टम' आरप्स्यते।

> इन्फ्लुएन्सर्-पुरस्कारः: प्रदेशस्य प्रचारं कुर्वन्तः 'कण्टेण्ट क्रिएटर' तथा 'इन्फ्लुएन्सर्' इति जनभ्यः पुरस्काराः दास्यन्ते।

**विशिष्ट-नीतिः**

> ब्लू इकोनॉमी (Blue Economy): जलस्त्रोतसाम् समीपे प्रदूषणं रोद्धु पर्यटनं नियमितं कर्तुं च इयं नीतिः प्रवर्तयिष्यते।

> सिल्वर इकोनॉमी (Silver Economy): बनूटी-नगरोटा-बगवां क्षेत्रयोः स्वास्थ्य-कल्याण-केन्द्राणि (Wellness Centers) निर्मीयन्ते।

> हाइकिङ्ग-डेस्टिनेशनम्: राज्यं विश्वस्तरीय-भ्रमण-स्थलत्वेन (Hiking Destination) विकसितुं नूतनाः 'ट्रेकिंग' मार्गाः अन्वेषिष्यन्ते।

# मादकद्रव्यस्य द्वौ महाविक्रेतारौ निगृहीतौ,



## अन्तर्राज्यीय-जालं ध्वस्तम्

हिमसंस्कृतवार्ताः - काङ्गड़ा।
नूरपुर-आरक्षकदलेन मादकद्रव्य-विरुद्धं चालिते विशेष-अभियाने एका महती सफलता प्राप्ता, यस्मिन् द्वयोः भिन्न-प्रकरणयोः द्वौ मुख्य-अपराधिनौ गृहीतौ। नूरपुर-जनपदस्य आरक्षकदलेन मादकद्रव्यस्य द्वौ महाविक्रेतारौ (Drug Dealers) निगृह्य अन्तर्राज्यीय-मादकद्रव्य-जालं ध्वस्तं कृतम्, येन नशा-तस्कर-जगति भीतिविह्वलता जातः अस्ति।

### प्रथमं प्रकरणम्: कठुआतः (जम्मु-काश्मीर) मुख्यतस्करस्य निग्रहणम्

आरक्षक-सूचनानुसारं सीआईए (CIA) नूरपुर-दलेन कठुआ-क्षेत्रात् एकः मुख्य-तस्करः गृहीतः। नूरपुर-आरक्षकस्थाने (Police Station) पञ्जीकृतस्य एनडीपीएस-अधिनियमस्य (NDPS Act) २९६/२०२५ क्रमांकस्य अभियोगानुसारं, ११ अक्टोबर् २०२५ दिनाङ्के कण्डवाल-अवरोधके (Barrier) ६.०४४ किलोग्राम-परिमितं 'चरस' इति मादकद्रव्यं प्राप्तम् आसीत्। तस्मिन् समये मण्डी-जनपदस्य त्रयः अपराधिनः घटनास्थले एव निगृहीताः।
अस्य अन्वेषणं वर्धयन् १ नवम्बर २०२५ दिनाङ्के मुख्य-अपराधी शुभकरणः (निवासी ज्वाली, काङ्गड़ा) चण्डीगढ़तः गृहीतः। तस्य गह्वर-पृच्छायाः (Interrogation) अनन्तरं अस्य सम्पूर्णस्य तन्त्रस्य अन्यः मुख्य-योजनाकारः (Mastermind) विजयकुमारः उर्फ वीके (निवासी कठुआ, जम्मु-काश्मीर) २२ मार्च २०२६ दिनाङ्के तस्य गृहात् निगृहीतः। अन्वेषणे ज्ञातं यत् चरसस्य इयं राशिः अस्मै एव प्रेषणीया आसीत्।

### द्वितीयं प्रकरणम्: पञ्जाबतः हेरोइन-तस्करस्य निग्रहणम्

द्वितीये प्रकरणे नूरपुर-आरक्षकदलेन पञ्जाब-राज्यस्य बटाला-निवासी मुख्य-अपराधी निगृहीतः। सूचनानुसारं दिसम्बर २०२५ तमे मासे राकेशकुमार नाम्नः अपराधिणः ६२.६६ ग्राम-परिमितं 'हेरोइन' इति मादकद्रव्यं तथा ५०,००० रूप्यकाणि च प्राप्तानि आसन्। विशेष-अन्वेषण-दलेन (SIT) कृतस्य तान्त्रिक-वित्तीय-निरीक्षणस्य अनन्तरं रोहितकुमारस्य नाम सम्मुखम् आगतम्। सः २१ मार्च २०२६ दिनाङ्के गुरदासपुर-स्थितस्य स्वगृहात् निगृहीतः।
आरक्षक-अधीक्षकः (SP) कुलभूषणवर्मा महोदयः अस्य विषयस्य पुष्टिं कृतवान्। सः अवदत् यत् एतेषां पृच्छायाः अनन्तरं अस्मिन् अन्तर्राज्यीय-जाले सम्मिलितानां अन्येषां जनानां परिचयार्थं प्रयासाः भविष्यन्ति।

# श्रीसनातनधर्मसभा रबौणः (सोलनम्) इत्यस्य कार्यसमिति-उपवेशनं सम्पन्नम्; "कल्याणी २०२६" पत्रिकायाः प्रकाशनाय निर्णयः स्वीकृतः

हिमसंस्कृतवार्ताः - सोलनम्।श्रीसनातनधर्मसभा (पञ्जीकृतम्)रबौणः, सोलनम् इत्यस्य कार्यकारिणी-समित्याः महत्त्वपूर्णा गोष्ठी श्रद्धेयस्य मुख्यसंस्थापकस्य संरक्षकस्य च श्री स्वाधीनचन्द्रगौड-महोदयस्य गरिमामय्याम् उपस्थितौ तथा सभायाः मान्याध्यक्षस्य श्री के.सी. बारिया-महोदयस्य अध्यक्षतायां विगत-१२ मार्च २०२६ दिनाङ्के सफलीभूता। अस्मिन् अवसरे कार्यसमित्या अनेके महत्त्वपूर्णाः निर्णयाः स्वीकृताः।

## "कल्याणी २०२६" पत्रिकायाः प्रकाशनम्

उपवेशने सर्वसम्मत्या अयं प्रस्तावः पारितः यत् अस्मिन् वर्षे अपि "कल्याणी २०२६" इति नाम्ना विशिष्टायाः पत्रिकायाः प्रकाशनं भविष्यति। विगतवर्षाणाम् इव अस्याः पत्रिकायाः लोकार्पणं मन्दिरपरिसरस्य पुण्य-स्थापनादिवसे १२ अगस्त २०२६ दिनाङ्के भविष्यति।

### लेखकेभ्यः आह्वानम् (लेख-प्रकाशनार्थं निमन्त्रणम्)

सभायाः पक्षतः सर्वेभ्यः विद्वद्भ्यः लेखकेभ्यः च विनम्रः अनुरोधः अस्ति यत् ते अधोलिखित-विषयेषु स्वकीयान् शोधपूर्णान् धार्मिक-आध्यात्मिक-लेखान् प्रेषयन्तुः
१. सनातनधर्मः, आस्था, दर्शनम् च। २. भारतीयसंस्कृतिः सभ्यता च। ३. तीर्थस्थानानि, मन्दिराणि च।
४. पुराणानि, उपनिषदः अन्यानि शास्त्राणि च।
विशेषः: सर्वेभ्यः लेखकेभ्यः पत्रिकायाः एका प्रतिः तेषां निर्दिष्टे सङ्केते पञ्जीकृत-डाक-माध्यमेन प्रेषयिष्यते।
श्रीसनातनधर्मसभायाः महासचिवः डॉ प्रेमलालगौतमः अकथयत् यत् "वयं राष्ट्रस्य सांस्कृतिक-चेतनायाः संवर्धनाय कटिबद्धाः स्मः।" श्रीसनातनधर्मसभा एतदर्थं प्रतिवर्षं विविधान् कार्यक्रमान् आयोजयति।

# विपक्षनेतुः जयरामठाकुरस्य महत् प्रतिपादनम्; उक्तम्- "जनतया सह काङ्ग्रेस-नेतृभिः अपि बजटं प्रतिषिद्धम्"



हिमसंस्कृतवार्ताः - शिमला। विपक्षनेता जयरामठाकुरः अकथयत् यत् बजटं प्रति सामान्यजनता तु दूरे अस्तु, काङ्ग्रेस-नेतृषु अपि कश्चन उत्साहः न दृश्यते। सः एतत् बजटं प्रदेशस्य इतिहासे 'सर्वाधिकं निराशाजनकम् अभिलेखम्' इति अघोषयत्। सः अवदत् यत् स्वस्य २९ वर्षाणां राजनैतिकजीवने अनेकानि बजट-प्रस्तौति दृष्टानि, किन्तु एतादृशं नीरसं दिशाहीनं च बजटं पूर्वं कदापि न दृष्टम्। एतत् बजटं दृष्ट्वा प्रदेशस्य जनता पश्चात्तापं करोति यत् तैः तादृशस्य दलस्य हस्ते सत्ता दत्ता, येन स्वस्य असफलताभिः कुनीतिभिः च हिमाचलप्रदेशः विकासमार्गात् अधः गर्तं प्रति प्रक्षिप्तः।जयरामठाकुरः अवदत् यत् केन्द्रीययोजनानां नामानि परिवर्त्य केवलं प्रशंसां प्राप्तुं प्रयत्नः कृतः अस्ति, किन्तु धरातले बजटस्य कश्चन वास्तविकः प्रबन्धः नास्ति। अतः कोऽपि वर्गः अनेन सन्तुष्टः नास्ति। मुख्यमन्त्री स्वकीयां विफलतां गोपयितुं सदने उपहासस्य साहाय्यं गृह्णाति। 'व्यवस्था-परिवर्तन' नाम्ना प्रदेशे प्रथमवारं एतादृशः सर्वकारः आगतः, यः जनेभ्यः किमपि दातुं स्थाने तेभ्यः छिनत्ति (Taking away)। सत्तां प्राप्य एव मुख्यमन्त्रिणा पूर्वतनसर्वकारेण स्थापितानि २००० तः अधिकानि संस्थानानि पिहितानि, अधुना च जनानां जनहितयोजनानां धनं कर्मचारिणां वेतनं च छिनत्ति। सर्वकारस्य एषः अत्याचारः अधुना असह्यः जातः अस्ति। जयरामठाकुरः मुख्यमन्त्रिणः अहङ्कारपूर्ण-व्यवहारस्य अपि तीव्रां आलोचनां कृतवान्।

## प्रशासनिक-अधिकारिणाम् उपेक्षा

जयरामठाकुरः आरोपं कृतवान् यत् मुख्यमन्त्रिणा बजटं सज्जीकुर्वतां प्रशासनिक-अधिकारिणां परिश्रमः पूर्णतया उपेक्षितः। सः तान् अधिकारिणः "दुग्धात् मक्षिका इव" बहिः क्षिप्तवान्, सर्वं श्रेयः च स्वयं ग्रहीतुं यतते। सः तादृशं भाषते स्म यथा पूर्णं बजटं तेन एकाकिना एव निर्मितम्।

## केन्द्रीययोजनानां साहाय्यम्

विपक्षनेतुः मते, अस्मिन् बजटे विकासस्य ये केचन पक्षाः कृताः सन्ति, ते सर्वे केन्द्रसर्वकारस्य साहाय्येन एव सम्भविष्यन्ति। कामम् मार्गनिर्माणस्य घोषणा भवतु वा 'राष्ट्रिय-स्वास्थ्य-मिशन' (NHM) कर्मचारिणां मानदेयवृद्धिः, सर्वमपि धनं केन्द्रसर्वकारेणैव दीयते। अस्मिन् मुख्यमन्त्रिणः व्यक्तिगतं योगदानं किमपि नास्ति।

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता आङ्ग्लदेशात् अस्ति। लण्डन-नगरे काचित् भारतीया त्रिचक्रिका दृष्टा। एकेन भारतीयेन एषः चलच्चित्र-खण्डः अन्तर्जाले स्थापितः। तत्रत्यैः जनैः महान् विस्मयः अनुभूतः।
**नन्दिनी-** वैदेशिक-मार्गेषु भारतीय-वाहनस्य दर्शनम् अतीव रोचकम्! इदानीं बेङ्गलूरु-नगरस्य वार्तां वदामि। एकः तन्त्रज्ञः बेल्लन्दुरु-क्षेत्रे उषितवान् अस्ति। तेन तस्य क्षेत्रस्य विषये महान् आक्षेपः कृतः। तेन उक्तम् यत् तत् क्षेत्रं नीरसं पाषाण-नगरम् इव अस्ति, तथा च मार्गेषु महान् सम्मर्दः अनुभूयते।
**काव्या-** सत्यम्, महा-नगरेषु जीवनम् अतीव कष्टकरं जातम् अस्ति। किन्तु अपरा वार्ता आशादायिनी अस्ति। आन्ध्रप्रदेशस्य लोकेशः नाम क्रीडकः अङ्गवैकल्येन ग्रस्तः। तथापि तेन क्षेत्रेषु महान् अभ्यासः कृतः। इदानीं सः वैश्विक-विकलाङ्ग-क्रीडासु भागं ग्रहीतुं सिद्धतां कृतवान् अस्ति।
**नन्दिनी-** तस्य प्रयासः अतीव श्लाघनीयः! सः सर्वेभ्यः प्रेरणादायकः। अन्यस्मिन् विषये, एकेन तन्त्रज्ञेन सप्तचत्वारिंशत्-लक्ष-रुप्यकाणां नूतन-कार्य-प्रस्तावः तिरस्कृतः। तेन चिन्तितम् यत् तस्मिन् कार्ये अत्यधिकः श्रमः अस्ति। अतः तेन धनापेक्षया मानसिक-शान्त्यै एव अधिकं महत्त्वं दत्तम्।
**काव्या-** उत्तमः निर्णयः! धनस्य अपेक्षया स्वास्थ्यं महत्त्वपूर्णम्। अद्यतनाः वार्ताः अत्रैव समाप्ताः।

# संस्कृतभाषा न केवलं भाषा, अपि तु भारतीयसंस्कृतेः प्राणाः - जगदानन्दझाः




**हिमसंस्कृतवार्ताः- लखनऊ।**
उत्तरप्रदेशसंस्कृतसंस्थानस्य आधिपत्ये आयोजितस्य दशदिनात्मकस्य आवासीयस्य 'सरलसंस्कृत- संभाषण- प्रशिक्षणशिविरस्य' गुरुवासरदिवसे भव्यः समापनसमारोहः सम्पन्नः। एकोनविंशतितमे मार्चदिनाङ्के समाप्ते अस्मिन् विशेषशिविरे उत्तरप्रदेशस्य विंशतितः अधिकेषु जनपदेषु, उत्तराखण्ड- राजस्थान- मध्यप्रदेशेभ्यः आगताः सहभागिनः संस्कृतभाषायाः व्यवहारिक- सरलप्रयोगस्य गाढं प्रशिक्षणं प्राप्तवन्तः। समापनसत्रे अवसरविशेषे सहभागिभिः प्रस्तुताः सांस्कृतिककार्यक्रमाः 'सुरभारती' इत्यस्य मधुरतां सजीवं कृतवन्तः।कार्यक्रमस्य समापनसत्रे संस्थानस्य प्रशासनिकाधिकारी जगदानन्द झाः मुख्यातिथिरूपेण उपस्थितः आसीत्। स्वस्य ओजस्विनि संबोधने सः सहभागिनां उत्साहं वर्धयन् उक्तवान् यत् "संस्कृतं केवलं प्राचीनग्रन्थानां भाषा नास्ति, अपि तु सा अस्माकं भारतीय- ज्ञान- परम्परायाः संस्काराणां च मूलाधारः अस्ति। संस्थानस्य ध्येयम् अस्ति यत् संस्कृतं जनभाषा भवेत्, येन अस्माकं युवावर्गः स्वमूलैः सह पुनः सम्बद्धा भवेत्।"
झामहोदयः पुनः बलं दत्त्वा उक्तवान् यत् "संस्कृतस्य माध्यमेन एव वयं विश्वकल्याणस्य भावनां सम्यग् अवगन्तुं शक्नुमः। एतेषु दशसु दिनेषु यूयं यत् धैर्यं परिश्रमं च प्रदर्शितवन्तः, तत् प्रशंसनीयम् अस्ति। अधुना भवतां दायित्वं अस्ति यत् अत्र लब्धं ज्ञानं स्वस्वप्रदेशेषु प्रसारयन्तु तथा संस्कृतं पुनः लोकव्यवहारस्य भाषा करोतु।"

**सांस्कृतिकप्रस्तुतयः मनोहराः अभवन्-**
समापनसमारोहस्य अवसरस्य मध्ये प्रशिक्षणार्थिनः स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृतवन्तः। लघुनाटकेषु माध्यमेन तैः दैनन्दिनजीवनस्य समस्याः तेषां समाधानानि च संस्कृतेन प्रस्तुतानि, येन सिद्धं यत् संस्कृतं आधुनिकविषयेषु अपि सम्यग् अभिव्यक्तुं समर्था अस्ति।
'अभिनयगीतानां' मधुरा प्रस्तुति सम्पूर्णं परिसरं संगीतमयं कृतवती। सामूहिकस्वरलहरीणां भावानां च समन्वयेन दर्शकाः मन्त्रमुग्धाः अभवन्। शास्त्रीयलोकनृत्ययोः प्रस्तुतिभिः भारतीयकलायाः संस्कृतस्य च अविच्छिन्नः सम्बन्धः प्रदर्शितः।

## सफलः अभवत् दशदिनात्मकः प्रशिक्षणकार्यक्रमः-

योजनाप्रभारी भगवानसिंह चौहान उक्तवान् यत् शिविरस्य समये वरिष्ठप्रशिक्षकाः धीरजमैठाणी, अनिलगौतमः, राधाशर्मा, पूनमसिंहः च सहभागिभ्यः क्रीडया सह समूहचर्चाभिः संस्कृतसंभाषणं शिक्षितवन्तः। वाराणसी प्रयागराज गोरखपुरादिभ्यः आगताः प्रतिनिधयः स्वानुभवान् सहकृतवन्तः तथा शिविरं जीवनस्य अमूल्यम् अध्यायम् इति अवदन्। कार्यक्रमस्य अन्ते सर्वेभ्यः सफलीभूतेभ्यः सहभागिभ्यः प्रमाणपत्राणि वितरितानि तथा उज्ज्वलभविष्यस्य शुभाशंसाभिः सह शिविरस्य औपचारिकः समापनः अभवत् ।

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये द्विदिवसात्मकस्याः

## अन्ताराष्ट्रिय- सङ्गोष्ठ्याः आयोजनम्



**हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः**
आगामिनि २६-०३-२०२६, २७-०३-२०२६ दिनाङ्कयोः कुमारभास्करवर्मसंस्कृत- पुरातनाध्ययन- विश्वविद्यालयस्य शिक्षाविभागेन, भारतीय- सामाजिकविज्ञान- अनुसन्धानपरिषदः (ICSSR) प्रायोजनेन, विश्वविद्यालयस्य आन्तरिक- गुणवत्ता- आश्वासनकेन्द्रस्य (IQAC) असम- कौशलविकास-अभियानस्य च सहयोगेन द्विदिवसात्मिकी एका अन्ताराष्ट्रिय-सङ्गोष्ठी आयोज्यते।
अस्याः सङ्गोष्ठ्याः मुख्यलक्ष्यं शिक्षाविदः, नीतिनिर्धारकान्, युवानेतॄन् च एकत्रानीय सुदृढसमाजस्य निर्माणाय शिक्षा- कौशलविकासयोः नवोन्मेषी-मार्गाणाम् उपरि चर्चाकरणम् अस्ति। आयोजकसमित्यानुसारं सङ्गोष्ठ्यां कौशलशिक्षायाः कार्यान्वयनम्, युवानां नियोजनीयता, उद्यमितायाः विकासः चेति विषयेषु विमर्शः भविष्यति।
अस्मिन् कार्यक्रमे राष्ट्रिय-अन्तर्राष्ट्रिय-संस्थानानां बहवः विशिष्टाः विद्वान्सः भागं ग्रहीष्यन्ति। अत्र अमेरिकादेशस्य 'सैम ह्युस्टन स्टेट' विश्वविद्यालयस्य प्राचार्यः हिरण्य के. नाथः, जर्मनीदेशस्य 'बोचम' प्रयुक्तविज्ञान- विश्वविद्यालयस्य प्राचार्यः क्रिश्चियन काजनरः, काठमाण्डू- विश्वविद्यालयस्य शिक्षा- महाविद्यालयस्य प्राचार्यः धनपति सुवेदी, कोलम्बो- विश्वविद्यालयस्य प्राचार्या तथा श्रीलङ्कादेशस्य राष्ट्रिय- शिक्षासंस्थानस्य महानिदेशिका डॉ. मञ्जुला विथानपथिराना, संयुक्तराष्ट्र- औद्योगिकविकाससङ्गठनस्य (UNIDO) देवजितदासवर्यः, देशस्य विविधानां प्रान्तानां विशिष्टाः शिक्षाविदः उपस्थिताः भविष्यन्ति।
सम्प्रति द्विशताधिकानि शोधपत्राणि आयोजकैः प्राप्तानि। आयोजकाः आशावन्तः सन्ति यत् ३५१ तः अधिकानां शोधकर्तॄणां विशेषज्ञानां च सक्रिय- सहभागित्वेन सङ्गोष्ठ्याः मूलमुद्देश्यानि सफलीभविष्यन्ति।

# जलगावनगरे हिन्दू-जनजागृतिः तथा शोभायात्रा समुत्साहेन सम्पन्ना

हिमसंस्कृतवार्ता- जलगाव (प्रतिनिधिः)
महाराष्ट्रराज्यस्य जलगावनगरे आशा- बाबा- नगर- परिसरे सकल-हिन्दू-समाजेन आयोजितः भव्यः हिन्दू-मेळावः रविवासरे (दि. २२ मार्च २०२६) सायंकाले उत्साह- भक्ति-संयुत-वातावरणे अत्यन्तं सफलतया सम्पन्नः। अस्य आयोजनस्य मुख्योद्देशः हिन्दू-समाजस्य एकता-सुदृढीकरणम्, सांस्कृतिकमूल्यानां संवर्धनं, धार्मिक- चेतनायाः च प्रसारः आसीत्। अस्मिन् अवसरे भव्यशोभायात्रा अपि समायोजिता। सा संकटमोचन-हनुमान-मन्दिरात्, पण्डितराव- कालोनी- प्रदेशात् आरभ्य आशा- बाबा- नगर- मन्दिरपर्यन्तं सुव्यवस्थितरूपेण सञ्चालिता। यात्रामार्गे ढोल-ताश- वाद्यनिनादैः, भगवद्ध्वज- लहरिभिः, "जय श्रीराम", "हर हर महादेव" इत्यादि घोषैः सम्पूर्णः परिसरः धर्ममयः अभवत्। नागरिकैः पुष्पवृष्ट्या यात्रायाः भव्यं स्वागतं कृतम्। अस्यां शोभायात्रायां स्त्री-पुरुष-बाल-वृद्धादयः सर्वे अपि उत्साहपूर्वकं सहभागीभूताः। विशेषतया मातृभगिन्यः पीत-केशर-वर्ण-वस्त्रैः सुसज्जिताः आसन्, बालिकाश्च पारम्परिक-वेषभूषया कलशान् वहन्त्यः शोभन्ते स्म। एतेन यात्रायाः शोभा बहुगुणिता जाता।
मेळाव-स्थले पिंप्राळा-प्रदेशस्य विख्यातः भागवतकारः सारंग-महाराजः आशीर्वचनं प्रदत्तवान्। तेन धर्मपालनस्य, संस्कारसंवर्धनस्य तथा समाजैक्यस्य महत्त्वं प्रभावेण प्रतिपादितम्।
आशीर्वचनम्– पिंप्राळा-प्रदेशस्य भागवतकारः सारंग-महाराजः।
वक्ता– सागरधनाड-महोदयः (देवगिरी- प्रान्त- सहसंयोजकः, तुलसी-नगर-प्रेम- नगर-निवासी, जलगाव)। तेन राष्ट्रभावना, संगठनशक्तिः तथा सामाजिक- जागरूकता इत्यादिषु विषयेषु ओजस्विनीं वाणीं प्रकटितवान्।
कार्यक्रमस्य अध्यक्षतां सेवानिवृत्तः मुख्याध्यापकः डी. बी. पाटीलमहोदयः अकरोत्। तेन शिक्षायाः, नैतिकमूल्यानां, समाजकर्तव्यस्य विषये मार्गदर्शनं कृतम्। कार्यक्रमस्य सूत्रसञ्चालनं प्रा डॉ देवानंद सोनार महोदयेन कृतम्। सम्पूर्णस्य कार्यक्रमस्य व्यवस्थापनं अत्यन्तं शिस्तबद्धतया कृतम्। सुरक्षा-व्यवस्था, पानजल- सेवा, अन्यसुविधाः च सम्यगुपकल्पिताः आसन्। कार्यक्रमः निर्विघ्नतया सम्पन्नः। अन्ते मन्दिरे समापन-समारोहे सर्वैः समाजैक्य- सुदृढीकरणाय, धर्मसंरक्षणाय तथा समाजसेवायै दृढः संकल्पः कृतः। आयोजकानां कार्यस्य सर्वत्र प्रशंसा अभवत्।

# विश्वजलदिवससमीक्षा(दिवसविशेषः)




विश्वे जीवनस्य मूलाधारः जलमेव अस्ति। "जलम् एव जीवनम्" इति प्रसिद्धं वचनं केवलं उक्तिमात्रं न, अपितु गूढसत्यस्य प्रकटीकरणम् अस्ति। पृथिव्यां ये ये जीवसमूहाः सन्ति—मानवाः, पशवः, पक्षिणः, वृक्षाः, कीटाः एते सर्वे अपि जलस्य आधारेण एव जीवितुं शक्नुवन्ति। जलं विना किमपि जीवनं न सम्भवति। अतः जलस्य संरक्षणं, सम्यक् उपयोगः, तस्य शुद्धता च मानवसमाजस्य मुख्यकर्तव्येषु गण्यते।

एतस्मिन् सन्दर्भे प्रतिवर्षं मार्चमासस्य २२ तमे दिनांके "विश्वजलदिवसः" आचर्यते। अस्य दिवसस्य उद्देश्यं जलस्य महत्त्वं प्रति जागरूकतां जनयितुं, जलसंरक्षणस्य आवश्यकतां बोधयितुं, तथा च विश्वे जलसमस्यायाः समाधानार्थं जनान् प्रेरयितुम् अस्ति।विश्वजलदिवसस्य प्रारम्भः संयुक्तराष्ट्रसंघस्य प्रयासेन अभवत्। १९९२ तमे वर्षे ब्राजीलदेशस्य रियोडीजेनेरोनगरे आयोजिते "पृथिवी सम्मेलन" (Earth Summit) इति कार्यक्रमे जलसमस्यायाः विषये गम्भीरा चर्चा अभवत्। तत्रैव जलसंरक्षणस्य महत्त्वं प्रतिपादितम्। ततः परं संयुक्तराष्ट्रसंघेन १९९३ तमे वर्षे प्रथमवारं मार्चमासस्य २२ तमे दिने विश्वजलदिवसः आचरितः। अद्य यावत् प्रतिवर्षं अस्य दिवसस्य एकः विशेषः विषयः (Theme) भवति, यस्य माध्यमेन जलसम्बद्धा विशिष्टायाः समस्यायाः चर्चा क्रियते—यथा जलप्रदूषणम्, जलाभावः, भूमिगतजलस्य क्षयः, जलसंरक्षणप्रणाल्यः इत्यादयः।

जलम् एकं अद्भुतं द्रव्यम् अस्ति, यत् त्रिषु अवस्थासु अस्ति—द्रव, कठोर (हिमरूपेण), वायुरूपेण (वाष्परूपेण)। अस्य रासायनिकसूत्रम् $H_2O$ इति वर्तते। जलं न केवलं जीवनस्य आधारः, अपितु पृथिव्याः तापमानस्य सन्तुलनं धारयति।

पृथिव्यां प्रायः ७१ प्रतिशतं भागः जलमयः अस्ति, किन्तु तस्मात् केवलं २.५ प्रतिशतं जलम् एव शुद्धं (पेयम्) अस्ति। अतः मानवोपयोगाय उपलब्धं जलं अत्यल्पम् अस्ति।

जलं समेषां जीवानां जीवनाधारः अस्ति ।सर्वे जीवाः जलं विना न जीवितुं शक्नुवन्ति। मानवशरीरे अपि ६०-७० प्रतिशतं जलम् अस्ति।कृषिकार्याय एवं परमावश्यकं भवति ।कृषिः जलाधारितव्यवस्था अस्ति। जलं विना अन्नोत्पादनं न सम्भवति।उद्योगानां कृते जलस्य आवश्यकता भवति।बहवः उद्योगाः जलं विना न संचालितुं शक्नुवन्ति। जलं पारिस्थितिकसन्तुलनं धारयति। जलं स्वच्छतायाः मुख्यसाधनम् अस्ति।

अद्यतनकाले विश्वे जलसमस्या अत्यन्तं गम्भीरा जाता अस्ति। बहवः देशाः जलाभावेन पीडिताः सन्ति।अफ्रीका, एशिया इत्यादिषु महाद्वीपेषु कोट्यधिकाः जनाः शुद्धजलस्य अभावेन पीड़िताः सन्ति। उद्योगैः, रसायनैः, प्लास्टिकवस्तुभिः च जलस्रोतांसि दूषितानि भवन्ति।अत्यधिकं दोहनं कृत्वा भूमिगतजलस्तरः अधः जायमानो विद्यते। वर्षापद्धतौ परिवर्तनं, हिमनद्याः गलनं च जलसंकटं वर्धयति।

भारते अपि जलसमस्या वर्धमाना अस्ति। कतिपयाः प्रदेशाः (यथा राजस्थान, गुजरातस्य केचन भागाः) अत्यल्पवृष्ट्या जलाभावेन पीड्यन्ते। अपरत्र केचन प्रदेशाः जलाप्लावेन पीड्यन्ते। गङ्गा, यमुना इत्यादयः महानद्यः अपि प्रदूषिताः अभवन्। औद्योगिकावशिष्टपदार्थाः,गृहावशिष्टपदार्थाः, रसायनानि च नद्यः दूषयन्ति। जलसमस्यायाः समाधानाय बहवः उपायाः सन्ति—

१. वर्षाजलसंग्रहणम् (Rainwater Harvesting) – वर्षाकाले पतितं जलं संगृह्य उपयोगः करणीयः।
२. वृक्षारोपणम् – वृक्षाः जलचक्रस्य सन्तुलनं धारयन्ति।
३. जलस्य मितव्ययता – अनावश्यकं जलव्ययः न कर्तव्यः।
४. पुनर्चक्रणम् – उपयोगात् परं जलस्य पुनः उपयोगः करणीयः।
५. जनजागरूकता – जनान् शिक्षयित्वा जलसंरक्षणाय प्रेरयितव्यम्।

विश्वजलदिवसस्य उद्देश्यानि
१. जलमहत्त्वस्य प्रचारः
२. जलसंरक्षणस्य प्रेरणा
३. जलप्रदूषणनिवारणस्य उपायाः
४. स्वच्छजलप्राप्तेः अधिकारस्य समर्थनम्
५. स्थायी विकासलक्ष्याणां पूर्तिः

विद्यालयेषु अपि विश्वजलदिवसः उत्साहेन आचर्यते। छात्राः निबन्धलेखनं, भाषणं, चित्रकला, नाट्यप्रदर्शनम् इत्यादिषु भागं गृह्णन्ति। तेन तेषां मध्ये जलसंरक्षणस्य चेतना विकसिताऽभवति।जलसंरक्षणे जनानां प्रयासः आवश्यकः भवति। सर्वकारस्य प्रयासाः केवलं पर्याप्ताः न भवन्ति। जनसामान्यस्य सहभागिता अत्यावश्यकी अस्ति। प्रत्येकं नागरिकः यदि स्वगृहे जलसंरक्षणं करिष्यति, तर्हि विशालपरिवर्तनं सम्भवति।उदाहरणरूपेण—

जलनलिकायाःअनावश्यकप्रवाहं निरोधयेत्।
स्नाने अल्पजलस्य उपयोगः करणीयः।
गृहे वर्षाजलसंग्रहणव्यवस्था करणीया।

भारतीयसंस्कृतौ जलस्य अत्यन्तं महत्त्वम् अस्ति। वेदेषु, पुराणेषु च जलं पवित्रं मन्यते। गङ्गाजलम् पवित्रतमं जलं इति प्रसिद्धं विद्यते । यज्ञकर्मसु, पूजासु, संस्कारेषु च जलस्य उपयोगः अनिवार्यः अस्ति।

"आपः स्वस्ति" इति मन्त्रः जलस्य मंगलकारित्वं सूचयति। अतः जलं न केवलं भौतिकदृष्ट्या, अपितु आध्यात्मिकदृष्ट्यापि महत्त्वपूर्णम् अस्ति।

सम्प्रति आधुनिकप्रौद्योगिकी अपि जलसंरक्षणे सहयोगं करोति। ड्रिप-इरिगेशन (सूक्ष्मसिंचनम्), स्प्रिंकलर-प्रणाली इत्यादयः कृषिक्षेत्रे जलस्य अल्पव्ययं कुर्वन्ति। जलशुद्धिकरणयन्त्राणि अपि दूषितजलस्य शुद्धिकरणं कुर्वन्ति।

अन्ते च अत्र वयं वक्तुं शक्नुमो यत् जलम् अमूल्यं संसाधनम् अस्ति। यदि वयं अद्य जलसंरक्षणे प्रयत्नशीलाः न भविष्यामः, तर्हि भविष्ये गम्भीरः जलसंकटः आगमिष्यति।

विश्वजलदिवसः अस्मान् स्मारयति यत्—
"जलस्य सरक्षणेन एव जीवनस्य रक्षा भविष्यति।"

अतः प्रत्येकं नागरिकस्य कर्तव्यं यत् सः स्वजीवने जलस्य सम्यक् उपयोगं करोतु, अपव्ययं न करोतु, अन्यान् अपि प्रेरयेतु।

एवमेव वयं पृथिव्याः, पर्यावरणस्य, भविष्यस्य च संरक्षणं कर्तुं शक्नुमः। सर्वेभ्यो विश्वजलदिवसस्य हार्दिकी शुभकामना। उक्तं च –

"जलं हि प्राणिनः प्राणाः
जलं शस्यस्य जीवनम्।
न जलेन विना लोके
शस्यबीजं प्रजायते।।"

॥ इत्यलम्॥

**डॉ विमलेश झा, डीएवी पब्लिक स्कूल, बरारी, भागलपुर,बिहार**

# हास परिहासम्

## प्रश्नाणाम् उत्तराणि आवश्यकानि

**प्रथमः प्रश्नः-**
यदि वयं रुदामः तर्हि नेत्राभ्यां अश्रवः पतन्ति, परञ्च यदि वयं हसामः तर्हि मुखतः दन्ताः किमर्थं न पतन्ति? 🤔

**द्वितीयः प्रश्नः-**
यदि ईश्वरस्य उपरि स्थापितं प्रसादं सर्वेभ्यः दीयते, तर्हि ईश्वरस्य उपरि स्थापितं धनं सर्वेभ्यः किमर्थं न दीयते? 🙄

**तृतीयः प्रश्नः-**
यदि धनस्य देवी लक्ष्मीः अस्ति, तर्हि धनपत्रमुद्रायाः उपरि गाँधी महोदयस्य चित्रं किमर्थम् 🤔

**डॉ.विदुषी अग्रवालः**



# विनोदकणिका

## "पत्युः प्रकाराः" 🙃

{१} स्नेह्युतः पतिः- अस्मिन् वेषे भवती अतीव सुन्दरी दृश्यते।
{२} दानशूरः/ उदारः पतिः- त्वं इच्छसि सा शाटिका क्रीणातु।
{३} समज्ञानपूर्णःपतिः- अद्य त्वं बहु श्रान्ता दृश्यते तर्हि उपहार गृहं भोजनार्थं गच्छावः।
{४} रसिकःपतिः- अहं भवत्याः कृते मल्लिकाया शुभिका आनीता।
{५} सरलः पतिः- मित्रं बहु प्रार्थितवान् किन्तु अहं केवलं द्वौ पेग पीतवान्। धूमवर्तिका सर्वथा त्यक्ता।
{६} एकनिष्ठः पतिः- अये! सा मम शालायां सखी किन्तु स्वभावः अत्यंत क्रोधी तवसादृश्य चित्ताकर्षी नास्ति।
{७} कष्टालु पतिः- अहं कार्यालयतः आगमनसमये एव शाकानि क्रीणितानि। किमर्थं पुनः परिश्रमं करोषि?
{८} आज्ञाधारकःपतिः- मित्रं पार्टीकृते आहूतवान् किन्तु मया चिन्तितं भवत्याः अनुमतिः आवश्यकी।
{९}मितव्ययशीलः पतिः- मौक्तिक ग्रेवेयकम् किमर्थं? मणीमाला अपि त्वं शोभते। मूलतः त्वं सुन्दरी असी।
{१०} स्वाभिमानी पतिः- अहं तव वचनात् बहिः नास्मि।
{११} साहसी पतिः- तव माता कियत् दिने अस्माकं गृहे स्थास्यति?
{१२} मितभाषी पतिः- आम्।
{१३} दृढः/ अविचलः पतिः- त्वं वदसि तत्! त्वं तथा अहं भिन्नं नास्ति। वयं एकेव खलु?
{१४} आर्जवी पतिः- अहं चायं पचामि भवती अपि पिबतु!

अस्मिन् वर्गे यदि भवत्याः पतिः नास्ति तर्हि दुर्भाग्यम् इति मत्वा तूष्णीं तिष्ठतु।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**